Sc

[A-40] Seat No:__________ **No. of Printed Pages: 02**

**Sardar Patel University**

**M. A. (Final) (External) Examination**

Tuesday **Date:** 17/04/2018 **Time:** 02.00 P.M. to 05.00 P.M.

**Subject Code:** SAN-506 **PAPER VI:** Brahmasutra Anubhashya (Adhyay- 1&2- Niyat Sutras), Brahmasutra Shribhashya (1.1.1)

**Total Marks: 100**

પ્રશ્ન: ૧ ગમે તે બે ગદ્યખંડ સાનુવાદ સમજાવો: (૧૪)

१. स्यादेतत्। ब्रह्मविचार एवारम्भणीयो न धर्मविचारः, सर्ववेदव्याकर्त्रा वेदव्यासेनाकृतत्वात्तुच्छफलत्वाच्च। कल्पोक्तप्रकारेण निःसन्दिग्धं करणसम्भवाच्च। आचारपरम्परयापि करणसम्भवाच्च। एतर्हीति सन्देहे सूत्रभाष्ययाज्ञिकानामेवानुवृत्तिः क्रियते न मीमांसकस्य। तस्मात्साङ्गवेदाध्येतुर्निः-सन्देहकरण-सम्भवान्न पूर्वयापि कृत्यम्। किञ्च, परमकृपालुर्वेदः संसारिणः संसारान्मोचयितुं कर्माणि चित्तशुद्ध्यर्थं बोधितवानिति कूपेऽन्धपातनवदप्रामाणिकत्वभियाऽवसीयते। विपरीतबोधिका तु पूर्वमीमांसा, तस्मादपि न कर्तव्येति।

२. द्युभ्वाद्यायतनं ब्रह्मैव। द्यौः भूश्चादिर्येषां ते द्युभ्वादयः तेषामायतनः। यस्मिन् द्यौरितिवाक्योक्तानां साधकं वदन् प्रथमपरिहारमाह। स्वशब्दात्। आत्मशब्दो व्याख्यातः स्वशब्देन। अत्र न जीवस्यात्मत्वेनोपासनार्थमात्मपदम्। किन्तु पूर्वोक्तानामात्मभूतम्। तेन न भारकृतो दोषः। कारणे हि कार्यमोतं भवति। सेतुत्वे च युज्यते। तज्ज्ञानेनामृतत्वप्राप्तेः। अभेदेपि ब्रह्मविदाप्नोति परमिति-वदर्थः। तस्मादबाधितार्थत्वाल्लक्ष्यस्य सर्वगतत्वव्युत्पादकत्वाद् द्युभ्वाद्यायतनं ब्रह्मैव।

३. स्वतन्त्रतया सर्वे वादा निराक्रियन्तेस्मिन् पादे। लोकानाम्भूर्भुवादीनामचेतनेन केवलेन प्रधानेन रचना नोपपद्यते। रचितत्वादेव न परिणामः। सर्वस्य संश्लेषप्रसंगात्। अचेतनकर्तृका रचना नाचेतनेन प्रधानेन कर्तुं शक्या। तस्मात् कारणत्वेन प्रधानं नानुमातव्यम्। अन्यथोपपत्त्या बाधितमेवानुमानमिति चकारार्थः।

४. जीवस्य क्रियाज्ञानशक्ती योगेन सिध्यतः। समाध्यभावात् शक्त्यभाव इत्यर्थः। चकारात् तादृश-मन्त्राभावोपि। न च सहजकर्तृत्वे अनिर्मोक्षः। पराधीनकर्तृत्व एवैतत्। ब्रह्मवत्। साङ्ख्यस्य तन्मतानुसारिणो वान्यस्य भ्रम एव कर्तृत्वे न मुक्तिरिति। नपुंसक एव मुच्येतेति बाह्यवत्। निरिन्द्रियस्यैव समाधिरित्यपि करणत्वेन बुद्धिं वदन् न केनापि दूष्यते। तस्माज्जीवस्य स्वाभाविकं कर्तृत्वम्।।

પ્રશ્ન: ૨ ગમે તે બે સૂત્રો સમજાવો: (૧૦)

१. ईक्षतेर्नाशब्दम्।

२. प्रकरणाच्च।

३. उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि।

४. परात्तु तच्छ्रुतेः।

પ્રશ્ન: ૩ ગમે તે બે વિશે નોંધ લખો: (૨૦)

૧. બ્રહ્મસૂત્રના ભાષ્યકારો વિશે નોંધ લખો

૨. વલ્લભાચાર્યનું જીવન

૩. વલ્લભે કરેલું જૈનમત ખંડન ચર્ચો

૪. વલ્ભાચાર્યે કરેલું પાંચરાત્રમતનું નિરાકરણ ચર્ચો

(પાન ઉલટાવો)

પ્રશ્ન: ૪ વલ્લભાચાર્યના મતે કાર્યકોટિ બ્રહ્મ વિશે નોંધ લખો (૧૬)

અથવા

પ્રશ્ન: ૪ 'पोषणं तद् अनुग्रहः' સમજાવો (૧૬)

પ્રશ્ન: ૫ (અ) ગમે તે એક ગદ્યખંડ સાનુવાદ સમજાવો: (૧૦)

१. अध्ययनगृहीतस्य स्वाध्यायस्य स्वभावत एव प्रयोजनवदर्थावबोधित्वदर्शनात्, गृहीतात् स्वाध्यायादवगम्यमानान् प्रयोजनवतोऽर्थानापाततो दृष्ट्वा, तत्स्वरूपप्रकारविशेषनिर्णयफलवेदवाक्यविचाररुपमीमांसा-श्रवणेऽधीतवेदः पुरुषः स्वयमेव प्रवर्तते। तत्र कर्मविधिस्वरूपे निरूपिते कर्मणामल्पास्थिरफलत्वं दृष्ट्वाध्ययनगृहीतस्वाध्यायैकदेशोपनिषद्वाक्येषु चामृतस्वरूपान्तस्थिरफलापातप्रतीतेस्तन्निर्णयफलवेदान्त-वाक्यविचाररूपशारीरकमीमांसायामधिकरोति। तथा च वेदान्तवाक्यानि केवलकर्मफलस्य क्षयित्वं ब्रह्मज्ञानस्य चाक्षयफलत्वं दर्शयन्ति तद्यथेह कर्मचितो लोकः क्षीयते, एवमेवामुत्र पुण्यचितो लोकः क्षीयते, अन्तवदेवास्य तद्भवति।

२. वक्ष्यति च ज्ञोऽत एव इति। अतः स्वयंप्रकाशोऽयमात्मा ज्ञातैव, न प्रकाशमात्रम्। प्रकाशत्वादेव कस्यचिदेव भवेत्प्रकाशः प्रदीपादिप्रकाशवत्। तस्मान्नात्मा भवितुमर्हति संवित्। संविदनुभूतिज्ञानादिशब्दाः संबन्धिशब्दा इति च शब्दार्थविदः। न हि लोकवेदयोर्जानात्यादेरकर्मकस्य, अकर्तृकस्य च प्रयोगो दृष्टचरः। यच्चोक्तम्- अजडत्वात्संविदेवात्मेति, तत्रेदं प्रष्टव्यम्-अजडत्वमिति किमभिप्रेतम्, स्वसत्ताप्रयुक्तप्रकाशत्वमिति चेत्; तथा सति दीपादिष्वनैकान्त्यं, संविदितिरिक्तप्रकाशधर्मानभ्युपगमेनासिद्धिरिति विरोधश्च।

પ્રશ્ન: ૫ (બ) નીચેનામાંથી કોઈપણ એક શ્રીભાષ્ય અનુસાર સમજાવો (૧૦)

૧. तत्त्वमसि। વાક્યનું રામાનુજે કરેલું અર્થઘટન સમજાવો

૨. यस्य मतं तस्य मतम् अविज्ञातं विजानताम्। શ્રુતિવાક્યનું રામાનુજે કરેલું અર્થઘટન સમજાવો

પ્રશ્ન: ૬ ગમે તે બે વિશે નોંધ લખો (૨૦)

૧. રામાનુજનું જીવન
૨. ધ્રુવાનુસ્મૃતિનાં સાધનો વિશે નોંધ લખો
૩. રામાનુજના મતે પ્રત્યક્ષ પ્રમાણ વિશે ચર્ચા કરો
૪. માયાવાદનું રામાનુજે કરેલું ખંડન ચર્ચો